INTERNATIONAL JOURNALOF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(1), January :2021
Online Copy Available: www.ijmer.in

# षट्कर्मभेदबोधकप्रमाणानां परामर्शः

**डा विघ्नेश्वर भट्टः**
सहायकप्राध्यपकः
अमृत - विश्व-विद्यापीठम्
मैसूरु

**पीठिका -**
शास्त्रं भेषजम् । रोगरूपस्य संशयस्य । यथा औषधज्ञानं न रोगोपशामकम् । किन्तु ज्ञातौषधानां सेवनम् । तथा परमं शास्त्रं वेदः । वेदोदित कर्मानुष्ठानं हितमातनोति । वैदिकगम्यं तद्रहस्यम् । तद्रहस्योद्घाटकं च पूर्वमीमांसाशास्त्रम् । कर्मकर्तृद्रव्यवैगुण्यं निवार्य तत्र साद्गुण्योपसम्पादनेन कर्मसाफल्योद्दीपकं मीमांसाशास्त्रम् । किन्तु मीमांसान्तरंगम् अवगन्तुं कः उपायः इति चिन्तयतः मीमांसाकरं मीमांसाशास्त्रं भाष्यवार्तिकवृत्तिरूपैः आख्यानोपाख्यानैः अर्थप्रकाशनं कृतवन्तः सुधियः । तमिमां सरणिम् अनुसरन् षट्कर्मभेदबोधकप्रमाणानां परामर्शः इतीमां पत्रिकां वाचककरगतां चिकीर्षिमि । धर्मः द्वादशलक्षणैः व्युत्पादितः । "विना प्रमाणं प्रमा नोपगच्छति" अतः धर्मे प्रमाणं विचारितं प्रथमाध्याये । द्वितीये शब्दान्तरात्-अभ्यासात्-गुणात्-संख्यया-संज्ञया-प्रकरणान्तरात् इति षट्कर्मभेदबोधकप्रमाणैः कर्मणां भेदः प्रतिपाद्यते ।

**बीजाक्षराणि** - शब्दान्तरात्- अभ्यासात्-गुणात्-संख्यया-संज्ञया-प्रकरणान्तरात् , भेदः , भावना, अपूर्वम्, अनुपादेयपञ्चकम्, लिङ्, धातुः,।

**भावना निरूपणम् -**
सिद्धे प्रमाणे भेदोऽत्र निरूप्यते । शास्त्रेऽस्मिन् भावनामुख्यविशेष्यत्वम् आद्रियते । सिद्धे भावनाभेदे तद्बोधककर्मापि भिद्यते इति हेतोः तद्भेदबोधकानि षट् प्रमाणानि अत्र निरूप्यन्ते । का नाम भावना ? किं तस्याः लक्षणम् ? किं तस्याः स्वरूपमित्यादि प्रश्नाः सामान्या एव । "यजेत स्वर्गकाम"(तां.ब्रा.१६.१५.५) इत्यादौ यजेत इत्यत्र अस्ति अंशद्वयम् । यजि धातुः प्रत्ययश्च । प्रत्ययेऽपि अस्ति अंशद्वयम् । आख्यातत्वांङ्त्वञ्च । तत्र आख्यातत्वाङ्त्वाभ्यां भावना उच्यते । भावना नाम "भवितुर्भवनानुकूलः भावकव्यापारविशेषः" । उत्पद्यमानस्य स्वर्गादिफलस्य उत्पत्त्यनुकूलः यागनिष्ठः उत्पादयितुः फलापेक्षकपुरुषस्य व्यापारविशेष इति निष्कर्षः । सा च शाब्दीभावना, आर्थीभावना इति द्विधा । शाब्दीभावना नाम प्रवर्तना इत्यर्थः । सा च प्रवर्तना लिङ् - ज्ञानेन उत्पद्यते । अत एव प्रवर्तना एव लिङर्थ इति भाट्टाः । इष्टसाधनत्वं लिङर्थः इति मिश्रः । इष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वं कृतिसाध्यत्वञ्चलिङर्थः इति नैयायिकाः । एतच्छक्तित्रयकल्पने गौरवापत्तेः प्रवर्तना एव लिङर्थ इति सिद्धान्तः । सा च प्रवर्तना स्वनिर्वाहार्थम् अंशत्रयमपेक्षते । किं भावयेत् ? केन भावयेत् ? कथं भावयेदिति । तत्र किं भावयेदिति साध्याकांक्षायां कृतिं भावयेदिति , केन भावयेदिति साधनाकांक्षायांङादिज्ञानेन भावयेदिति , कथं भावयेदिति इतिकर्तव्यताकांक्षायाम् अर्थवादज्ञाप्यप्राशस्त्यज्ञानम् इतिकर्तव्यतात्वेन च अन्वेति । एवमेव आख्यातप्रत्ययेन आर्थीभावना उच्यते । आख्यातप्रत्ययस्य कृतिरेव अर्थः । वैयाकरणास्तावत् आख्यातप्रत्ययस्य कर्तरि शक्तिम् अभ्युपगच्छन्ति । परन्तु आकृत्यधिकरणन्यायेन कृतावेव शक्तिः कर्तरि लक्षणा अङ्गीक्रियते । कृतिः कर्तारं विना नावतिष्ठत इति तमाक्षिपति इति कृत्वा न कर्ता आख्यातवाच्यः । सा च कृतिः स्वनिर्वाहार्थं शाब्दीभावनावदंशत्रयम् अपेक्षते । तत्र साध्याकांक्षायां स्वर्गादिफलं साध्यत्वेनान्वेति । साधनाकांक्षायां धात्वर्थः साधनत्वेनान्वेति । कथम्भावाकांक्षायां प्रयाजाद्यङ्गजातम् इतिकर्तव्यतात्वेन अन्वेति । इत्थञ्चाङादिवाच्यशाब्दीभावना प्रवर्तनारूपप्राशस्त्यज्ञानाद्यनुगृहीता इष्टसाधनत्वाद्याक्षेपमुखेन मुख्यविशेष्यभूतायाम् आख्यातार्थकृतौ एवान्वेति । सा च कृतिः पुरुषं कर्मणि नियोजयति कर्मजन्यफलावाप्तिं निबोधयति च । इत्थञ्च सिद्धं कर्मनिर्वहणे भावना एव मुख्या भवतीति । तत्रैव वाक्यबोध्यानां पदार्थानाम् अन्वयः अभ्युपगन्तव्यः । " यजेत स्वर्गकामः " इत्यादौ यजेत इत्यत्र विद्यमानया भावनया यागे प्रवृत्तिः जायते । प्रवृत्तस्य किं फलम् इत्याकांक्षायां स्वर्गफलं भाव्यत्वेन अन्वेति । तदा यागः स्वर्गसाधनमिति विज्ञायते ।

**अपूर्वनिरूपणम् -**
यागादिजन्यः स्वर्गादिजनकः कश्चनव्यापारविशेषः अपूर्वपदेन व्यवह्रियते । " ज्योतिष्टोमेन स्वर्गकामो यजेत " इत्यनेन ज्योतिष्टोमेन स्वर्गं भावयेदिति वाक्यार्थः बुध्यते । अत्र स्वर्गयागयोः साध्यसाधनरूपसम्बन्धः प्रदर्शितः । किन्तु क्रियारूपाणां यागादिकर्मणां क्षणिकत्वात् फलप्राप्तिपर्यन्तं तेषां स्थायित्वं नैव सम्भवति । कार्यनियतपूर्ववृत्तिः कारणमिति कारणलक्षणमुक्तम् । तदनुरोधेन कार्यपूर्वक्षणे कारणं भवेदेव । तथा च यागसमाप्त्यनन्तरमेव स्वर्गस्य प्राप्तौ उक्तः साध्यसाधनभावः युक्तो भवति । परन्तु यागसमनन्तरमेव फलप्राप्तिः नैव भवति । अपि तु कालान्तरे देशान्तरे देहान्तरे वा भविष्यति । अत एव यागफलयोः कार्यकारणभावनिर्वाहार्थम् अपूर्वनामकः कश्चनव्यापारविशेषः कल्प्यते । यागादिजन्यः स्वर्गादिजनकः कश्चिद्व्यापारविशेषः अपूर्वपदेन व्यवह्रियते । न च ध्वस्तस्य यागस्य फलसाधनत्वं सम्भवति । ध्वंसस्य जनकशक्त्यभावात् नित्यत्वाच्च । "तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति" इत्याद्यर्थवादबलेन देवतातृप्तेरेव फलसाधनत्वमस्तु इति केचित् । नवमाध्याये देवताविग्रहादिपञ्चकस्य निराक्रियमाणत्वात् देवतातृप्तेः फलसाधनत्वं नाङ्गीक्रियते । अत एव अपूर्वेणैव फलं भावनीयम् । तच्चापूर्वं द्विविधम् अङ्गापूर्वं महापूर्वञ्चेति । अनेकप्रधानकयागे प्रधानानां फलसाधनतानिर्वाहार्थं प्रथमं सर्वप्रधानसाध्यं परमापूर्वमेकं कल्प्यते । पश्चात् अङ्गसाहित्यसिध्यर्थं अङ्गापूर्वाणि कल्प्यन्ते । यथा लघोरेकस्य यन्त्रस्य सम्बन्धेन विना बृहद्यन्त्रं कार्यक्षमं नैवभवति । तथा लघुनाप्येकेन अङ्गेन विना यागः स्वर्गसाधनक्षमो नैव भवति । अत एव सर्वेषाम् अङ्गानां स्वस्वापूर्वद्वारा प्रधानेन साहित्यं अवश्यं कल्पनीयम् । इत्थञ्च यागेन परमापूर्वम् उत्पद्यते यागाङ्गैः उत्पन्नानि अङ्गापूर्वाणि परमापूर्वोपकारकाणि भवन्ति । इदञ्च अपूर्वं फलपर्यन्तम् आत्मस्थायी भवति फलं जनयित्वा प्रध्वंसते ।

**कर्मभेदबोधकप्रमाणनि -**
भावनाभेदे ज्ञाते तद्बोधककर्मभेदः सिध्यति , सिद्धे कर्मभेदे कर्मजन्य अपूर्वभेदोऽपि सिध्यति इति कृत्वा भावनाभेदबोधकानि षट् प्रमाणानि विविच्यन्तेऽत्र । शब्दान्तरात् , अभ्यासात् , सङ्ख्यया , संज्ञया , गुणात् , प्रकरणान्तरादिति षट् कर्मभेदबोधकप्रमाणानि ।

**शब्दान्तरात् कर्मभेदनिरूपणम् -**
"सोमेन यजेत"(तै.सं.३.२.२) , "हिरण्यमात्रेयाय ददाति " (शत.ब्रा.४.३.४२.१) , "दाक्षिणानि जुहोति" (तै.सं.६.१.१) इत्यादिषु यागदानहोमाः विहिताः । यजेत ददाति जुहोति इत्यत्र विद्यमानेन "लेटस्थानीयतिप्" प्रत्ययेन भावना उच्यते । न च एकप्रत्ययगम्यत्वात् भावनाभेदाऽभावः । प्रत्ययस्यैकत्वेऽपि धात्वर्थानां भेदात् भावनापि भिद्यते । विभिन्नधात्वर्थकत्वमेव शब्दान्तरत्वपदेन व्यवह्रियते । यजेत इत्यनेन यागभावना, ददाति इत्यनेन दानभावना , जुहोति इत्यनेन होमभावना च विधीयते । अत एवात्र शब्दान्तरात्कर्मभेदोऽङ्गीक्रियते । वार्तिके च :-

" प्रत्ययांशः समानोऽपि प्रतिधातुप्रयोगतः।

तत्तदर्थानुसारेण भावनाभेदमावहेत् ॥"इति॥

**अभ्यासात् कर्मभेदनिरूपणम् -**
दर्शपूर्णमासयोः - "समिधो यजति" "तनूनपातं यजति" "इडो याजति" "बर्हिर्यजति" "स्वाहाकारं यजति" (तै.सं.२.६.१) इति श्रूयते । न चात्र विभिन्नधात्वर्थकत्वाभावात् कर्मभेदाभावः इति वाच्यम् । अत्र समिदादिपदानि तत्प्रख्यशास्त्रात् नामधेयपराणि । विभिन्नधात्वर्थकत्वाभावेऽपि विभिन्ननामधेयैः धात्वर्थस्य व्यवच्छेदसम्भवात् कर्मभेदः बोध्य एव । अत एव अनन्यपरपुनर्धिश्रवणरूपात् अभ्यासात् कर्म भेदः अभ्युपगम्यते ।

**संख्यया कर्मभेदनिरूपणम् -**
चातुर्मास्यप्रकरणे श्रूयते "आमनमस्य आमनस्य देवा इति तिस्र आहुतीर्जुहोतीति" (तै.सं.२.६.९) । तत्र "आमनमस्य आमनस्य देवा ये सजाताः समनसः , आमनमस्य आमनस्य देवा ये कुमाराः समनसः , आमनमस्य आमनस्य देवा या स्त्रियः समनसः"(तै.सं.२.६.९) इति मन्त्रत्रयमभिहितम् । न चात्र सामानाधिकरण्याभावात् सङ्ख्यायाः भावनान्वयाभावात् न कर्मभेदः इति वाच्यम् । अपि तु अत्र त्रित्वसङ्ख्यायाः भावनया सह सामानाधिकरण्यासम्भवात् धात्वर्थवृत्तित्वम् अभ्युपगम्य एकत्वसङ्ख्याभावात् त्रिभिर्मन्त्रैः प्रत्येकमाहुतिरिति विज्ञेयम् । तस्मादत्र सङ्ख्याकृतः कर्मभेदः अभ्युपगम्यत एव ।

**संज्ञया कर्मभेदनिरूपणम् -**
चतुर्थः संज्ञया कर्मभेदः । "अथैष ज्योतिः"(तां.ब्रा.१६.८.१) "अथैष विश्वज्योतिः" (तां.ब्रा.१६.१०.१) "अथैष सर्वज्योतिः"(तां.ब्रा.१६.९.१) "एतेन सहस्रदक्षिणया यजेत " (तां.ब्रा.१६.८.३) इत्यत्र संज्ञया कर्मभेदो विज्ञेयः । न चात्र ज्योतिष्टोमानुवादेन दक्षिणाविधानं बोध्यम् । तत्र च द्वादशशतदक्षिणायाः विधानात् दक्षिणाकाङ्क्षायाः शान्तत्वात् । तथा च गुणविधानाङ्गीकारे ज्योत्यादीनां पदानां वैयर्थ्यप्रसङ्गः । अत एवात्र अथशब्देन परस्पर भेदबोधकत्वावगमात् ज्योतिविश्वज्योतिसर्वज्योत्याख्याः त्रयः यागाः विधीयन्ते इति बोध्यम् । "एतेन सहस्र दक्षिणया यजेत" इत्यत्र एतच्छब्देन प्राप्तयागानुवादेन दक्षिणा विधीयते ।

**गुणात् कर्मभेदनिरूपणम् -**
"तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनमिति "(बौधा.श्रौ.५.९) चातुर्मास्यप्रकरणे श्रूयते । वाजिभ्यो वाजिनमित्यत्र आमिक्षायागानुवादेन गुणविधानं वा उत कर्मान्तरं वा इति सन्देहः । न च वाजमन्नम् आमिक्षारूपं एषां विद्यते इति व्युत्पत्त्या विश्वेदेवम् अनूद्य वाजिनमत्र विधीयते इति वाच्यम् । वाजि शब्दस्य विश्वेदेवानुवादकसामर्थ्याभावात् । अपि तु

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः ।

देवतायाः विधिस्तत्र दुर्बलन्तु परम्परम् ॥

इत्यादियुक्तिबलेन वाजिभ्यः इत्यत्र श्रूयमाणचतुर्थ्या देवता एव परिगृह्यते । अत एव वाजिदेवताकं वाजिनगुणकं कर्मान्तरम् उपरितनवाक्येन विधीयते इति बोध्यम् । तथा च

आमिक्षां देवतायुक्तां वदत्यैवैष तद्धितः।

आमिक्षापदसान्निध्यात् तस्यैव विषयार्पणम्॥

आमिक्षा इति तद्धितेन द्रव्यदेवतावैशिष्ट्यावगमात् द्रव्यान्तरनैरपेक्षाच्च आमिक्षायागे वाजिनस्य अप्रवृत्तेः वाजिनयागः अन्य एव भवति । अत एव गुणात् अत्र कर्मभेदो बोध्यः ।

**प्रकरणान्तरात् कर्मभेदनिरूपणम् -**

कौण्डपायिनामयने श्रूयते "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति"(ता.ब्रा.२५.४.१) इति । अत्र प्रकरणान्तरात् कर्मभेदः अङ्गीक्रियते । न चात्र नित्याग्निहोत्रानुवादेन आहवनीयवत् मासरूपगुणविधानमस्तु इति वाच्यम् । मासपदं काले प्रसिद्धम् । कालस्तावत् अनुपादेयो गुणः। अनुपादेयो नाम कृतिसाध्यत्वाभाववान् । कृतिसाध्यत्वाभाववतः विधानमपि अशक्यम् । प्राप्तस्य अग्निहोत्रयागस्य विधानमपि न शक्यते । अत एव कौण्डपायिनप्रकरणान्तर्गतं कर्मान्तरमेव इति उपरितनेन वाक्येन विज्ञेयम् ।

**अनुपादेयपञ्चकनिरूपणम् -**

न केवलः कालोऽनुपादेयः । अपि तु
देशः कालो निमित्तं च फलं संस्कार्यमेव च ।
इति मीमांसकाः प्राहुः अनुपादेयपञ्चकम् ॥
न च देशः कृतिसाध्यः । अन्यत्र विद्यमानो देशः अन्यत्र कर्तुमशक्यः। "सरस्वत्या दक्षिणेन तीरेण आग्नेयोऽष्टाकपालः" इत्यनेन सरस्वतीतीरे अष्टाकपालयागः कर्तव्यः इति बुध्यते । न च यागोऽयं अन्यत्र कर्तुं शक्यः । सरस्वतीतीरादन्यत्र सरस्वतीतीरस्य अनुपलब्धेः । द्वितीयस्तावत् कालः । "सायं जुहोति"(तै.सं.२.५.३) "प्रातर्जुहोतीत्यादौ"(तै.सं.२.५.३) कालसम्बन्धः विधीयते न तु कालः । न च सायङ्कालः तद्व्यतिरिक्तकाले कर्तुं शक्यः। अत एव अयमनुपादेयः ।

एवं "ग्रस्ते स्नायात्" इत्यत्र निमित्तकृतानुपादेयता बोध्या । अनेन वाक्येन ग्रहणनिमित्तकं नैमित्तकं स्नानं ग्रहणकाले एव अनुष्ठेयम् । न च ग्रहणं कृत्वा स्नानं कर्तुं शक्यम् । अत एव निमित्तमपि अनुपादेयत्वेनैव गृह्यते ।

"यजेतः स्वर्गकामः" इत्यत्र यागेन स्वर्गं भावयेदिति वाक्यार्थः । अत्र यागः स्वर्गसाधनम् । स्वर्गस्तु यागसाध्यं फलम् । तच्च फलं यागेन उत्पद्यते नाम अवाप्यते न क्रियते । न च वृक्षारोपिणा एव फलमपि क्रियते । अपि तु आरोपिते वृक्षे फलमुत्पद्यते । तदनुकूलसालपवनादीनां व्यवस्था तेन क्रियते । अत एव फलमपि अनुपादेयो गुणः।

"व्रीहीन् प्रोक्षतीत्यत्र"(शत.१.३.१.१०) प्रोक्षणं व्रीह्युद्देशेन विधीयते । तेन प्रोक्षणेन कश्चन संस्कारः व्रीहिषु उत्पद्यते । न प्रोक्षणेन संस्कार्याणां व्रीहीणामुत्पत्तिः। एवञ्च अनुपादेयगुणानां विधानं नैव शक्यते इति कृत्वा तेषां सम्बन्धविधानमङ्गीक्रियते ।

उपसंहारः -
इत्थञ्च भिन्नैः कर्मभिः तदनुगुणं भिन्नं अपूर्वमुत्पद्यते तेन च लभ्यमानं फलमपि भिद्यते इति सिद्धो भेदाध्यायः ।

**॥ ग्रथने आदृतग्रन्थाः॥**

१ शाबरभाष्यसहितं मीमांसादर्शनम्
सं-श्रीमन्महा-देव चिमणाजी आपटे
संस्कृतम् देवनागरी
आनन्दाश्रम-प्रेस् १९३१
२ मीमांसा श्लोकवार्तिकम्
कुमारिलभट्टः
संस्कृतम् देवनागरी
रत्न पब्लिकेशन्स, वाराणसी २०१३
३ तन्त्रवार्तिकसहितं मीमांसादर्शनम्
सं- विनायक गणेश आपटे
संस्कृतम् देवनागरी
आनन्दाश्रम-प्रेस् १९३०
४ तन्त्रवार्तिकम्
कुमारिलभट्टः
संस्कृतम् देवनागरी
चौकाम्बा संस्कृत सीरीज, बनारस १९०३

५ टुप्टीका कुमारिलभट्टः
संस्कृतम् देवनागरी
विद्याविलास प्रेस बनारस १९०४
६ मीमांसाकौस्तुभः
खण्डदेवः
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीस आफिस, बनारस १९२९
७ भाट्टदीपिका
खण्डदेवः
संस्कृतम् देवनागरी
श्री सद्गुरु पब्लिकेशन्स, देहली १९८७

८ शास्त्रदीपिका
पार्थसारथि-मिश्रः
संस्कृतम् देवनागरी
चौखम्बा कृष्णदास अकाडमि वाराणसी २००३
९ भाट्टसंग्रहः
राघ्वेन्द्रयति-सार्वभौमः
संस्कृतम् देवनागरी
द्वैतवेदान्त-ष्टडीस् &रीसर्च् फौन्डेशन् बसवनगुडि, बेङ्गलूरु २००४
१० मानमेयोदयः
सं-टि. गणपति शस्त्री
संस्कृतम् देवनागरी
अनन्तशयन संस्कृत ग्रन्थावलिः १९१२
११ भाट्टनयोद्योतः
नारायणसुधी
संस्कृतम् देवनागरी
राष्ट्रिय संस्कृत संस्थानम्, २००६
१२ मीमांसान्यायप्रकाशः
आपदेवः
संस्कृतम् देवनागरी
चौकाम्बा संस्कृत संस्थान, वाराणसी २००८
१३ अर्थसङ्ग्रहः
लौगाक्षिभास्करः
संस्कृतम् देवनागरी
राष्ट्रिय संस्कृत संस्थान २००२
१४ मीमांसापरिभाषा
कृष्णयज्वा
संस्कृतम् देवनागरी
चौखम्बा कृष्णदास अकादमी, वाराणसी २००९
१५ मीमांसानयमञ्जरी
पं पट्टाभिराम शास्त्री
संस्कृतम् देवनागरी
सम्पूर्णानन्द संस्कृत युनिवर्सिटि १९८४
१६ भाट्टचिन्तामणिः
श्री गागाभट्टः
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस १९३३
१७ अध्वरमीमांसा कुतूहलवृत्तिः

INTERNATIONAL JOURNALOF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(1), January :2021
Online Copy Available: www.ijmer.in

सं- कुप्पुस्वामि शास्त्रिगल्
संस्कृतम् देवनागरी
वाणीविलास प्रेस् १९०७
१८ प्रभाकरविजयः
नन्दीश्वारः
संस्कृतम् देवनागरी
संस्कृतसाहित्यपरिषत्, कलिकाता १९२६
१९ प्रकरणपञ्चिका
श्री शालिकनाथः
संस्कृतम् देवनागरी
बनारस हिन्दू विश्वविद्यालयः
२० मीमांसाकोशः
केवलानन्दसरस्वती
संस्कृतम् देवनागरी
लक्ष्मणशास्त्री जोशि, तर्कतीर्थः, प्रज्ञापाठशाला, मुम्बई. १९५२
२१ विधिरसायनम्
श्री अप्पय्यदीक्षितः
संस्कृतम् देवनागरी
बाबू हरिदासगुप्त, विद्याविलास यन्त्रायय: १९०१
२२ जैमिनीयन्यायमाला
माधवाचार्यः
संस्कृतम् देवनागरी
कृष्णदास अकाडमि वारणासि १९८९
२३ Mimamsa Sutras Of Jaimini
Translated by- Mohan Sanadal
Motilal Banarasidass Publishers Private LT Delhi -1925

२४ मीमांसाकरदीपिका
विघ्नेश्वरभट्टः
संस्कृतम् देवनागरी
यज्ञवेदिप्रतिष्ठानम् मैसूरु -२०१३
२५ मीमांसा-उध्दरण-कोशः
संपादकः - श्री धन्नालाल जवहरलाल अग्रवाल
संस्कृतम् देवनागरी
तिलकमहराष्ट्रविद्यापीठ-शाखाभूत-वैदिकसंशोधनमण्डलेन प्रकाशिता -१९८५
२६ शास्त्रदीपिका
विमलाहिन्दीटीकासहिता
डा. गजाननशास्त्री मुसलगांवकर
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - ४२८
२७ अथर्ववेदसंहिता
मूलमात्रम्
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - १८
२८ ऋग्वेदसंहिता
मूलमात्रम्
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - ८४
२९ काठकसंहिता

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(1), January :2021
Online Copy Available: www.ijmer.in

मूलमात्रम्
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - ११
३० मैत्रायणीयसंहिता
मूलमात्रम्
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - ११४
३१ वेदनिर्झरी - वैदिकमन्त्र, सायणभाष्य, हीन्दीव्याख्या, व्याकरणटिप्पणी सहिता
पुष्पा गुप्ता
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - ४२७
३२ शतपथब्राह्मणम्
सायणभाष्यसहितम्
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - १७१
३३ ऋग्वेदीयब्रह्मकर्मसमुच्चयः
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - ९३
३४ कुण्डमण्डपसिद्धिः
संस्कृतहिन्दीटीकासहितः
महर्षि अभयकात्यायनप्रणीतः
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - ३९५
३५ गौतमधर्मसूत्रम्
परिमार्जितहरदत्तकृतमिताक्षरव्याख्यावृत्तिसहितम्
संस्कृतम् देवनागरी
चौखम्बा संस्कृत सीरीज आफिस, बनारस - २७७